# अध्यायः ९

# राजविद्याराजगुह्ययोगः

**अवतरणिका**

अष्टमे नाडी-द्वारेण धारणा-योगः सगुण उक्तः।

तस्य च फलमग्न्यर्चिरादि-क्रमेण कालान्तरे ब्रह्म-प्राप्ति-लक्षणमेवानावृत्तिरूपं निर्दिष्टम्।

तत्रानेनैव प्रकारेण मोक्ष-प्राप्ति-फलमधिगम्यते, नान्यथा, इति तदाशङ्का-व्याविवृत्सया[1] -

**श्रीभगवानुवाच।**

**इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।**

**ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्।। ९.१ ।।**

यद् ज्ञात्वा अशुभाद् मोक्ष्यसे (तद्) इदं गुह्यतमं विज्ञानसहितं ज्ञानं तु ते अनसूयवे प्रवक्ष्यामि ।। १ ।।

इदमिति। इदं ब्रह्म-ज्ञानं वक्ष्यमाणमुक्तं च पूर्वेष्वध्यायेषु, तद् बुद्धौ सन्निधीकृत्य इदमित्याह।

तु-शब्दो विशेष-निर्धारणार्थः।

---

[1]व्याविवर्त्तयिषया इति वा।

इदमेव तु सम्यग्ज्ञानं साक्षान्मोक्ष-प्राप्ति-साधनं वासुदेवः सर्वमिति (गी ७.१९), आत्मैवेदं सर्वम् (छा. ७.२५.२), एकमेवाद्वितीयम् (छा. ६.२.१) इत्यादि-श्रुति-स्मृतिभ्यः, नान्यत्।

अथ ते येऽन्यथाऽतो विदुरन्य-राजानस्ते क्षय्य-लोका भवन्ति (छा. ७.२५.२) इत्यादि-श्रुतिभ्यश्च।

**ते** तुभ्यं **गुह्यतमं** गोप्य-तमं **प्रवक्ष्यामि** कथयिष्यामि। **अनसूयवे** असूया-रहिताय।

किं तत् **ज्ञानम्**। किं-विशिष्टम् **विज्ञानसहितम्** अनुभव-युक्तम्।

**यद्** ज्ञानं **ज्ञात्वा** प्राप्य **मोक्ष्यसे** **अशुभात्** संसार-बन्धनात्।। १ ।।

तच्च -

**राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्।**

**प्रत्यक्षावगमं धर्म्यं सुसुखं कर्त्तुमव्ययम्।। ९.२ ।।**

राजविद्या राजगुह्यं पवित्रम् इदम् उत्तमम् प्रत्यक्षावगमं धर्म्यं सुसुखं कर्त्तुमव्ययम्।। २ ।।

राजविद्येति। **राजविद्या** विद्यानां राजा[2] दीप्यतिशयत्वात्।

दीप्यते हीयमतिशयेन ब्रह्म-विद्या सर्व-विद्यानाम्। तथा **राजगुह्यं** गुह्यानां राजा।

**पवित्रं** पावनम् **इदमुत्तमं** सर्वेषां पावनानां शुद्धि-कारणमिदं ब्रह्म-ज्ञानमुत्कृष्टतमम्।

अनेक-जन्म-सहस्र-सञ्चितमपि धर्माधर्मादि समूलं कर्म क्षण-मात्रादेव भस्मी करेति यतोऽतः किं तस्य

पावनत्वं वक्तव्यम्।

---

[2] राजदन्तादिषु पठितत्वात् परनिपातः।

किञ्च **प्रत्यक्षावगमं** प्रत्यक्षेण सुखादेः इव अवगमो यस्य तत्प्रत्यक्षावगमम्।

अनेक-गुणवतोऽपि धर्म-विरुद्धत्वं दृष्टम्। न तथाऽऽत्मज्ञानं धर्म-विरोधि। किन्तु **धर्म्यं** धर्मादनपेतम्।

एवमपि स्याद् दुःख-संपाद्यमित्यत आह - **सुसुखं** **कर्त्तुं** यथा रत्न-विवेक-विज्ञानम्।

तत्राल्पायासानां कर्मणां सुख-संपाद्यानामल्प-फलत्वं, दुष्कराणां च महा-फलत्वं दृष्टम्।

इदं तु सुख-संपाद्यत्वात् फल-क्षयाद् व्येतीति प्राप्तम्।

अत आह **अव्ययं** नास्य फलतः कर्मवद् व्ययोऽस्तीत्यव्ययम्। अतः श्रद्धेयम् आत्मज्ञानम्।। २ ।।

ये पुनः -

**अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप।**

**अप्राप्य मां निवर्त्तन्ते मृत्युसंसारवर्त्मनि।। ९.३ ।।**

परंतप अस्य धर्मस्य अश्रद्धधानाः पुरुषाः माम् अप्राप्य मृत्युसंसारवर्त्मनि निवर्त्तन्ते ।। ३ ।।

अश्रद्दधाना इति। **अश्रद्दधानाः** श्रद्धा-विरहिता आत्म-ज्ञानस्य **धर्मस्यास्य** स्वरूपे तत्फले च नास्तिकाः

पाप-कारिणोऽसुराणामुपनिषदं देह-मात्रात्म-दर्शनमेव प्रतिपन्नाः असु-तृपः **पुरुषाः** **परन्तप**।

**अप्राप्य** **मां** परमेश्वरम्। मत्प्राप्तौ नैवाशङ्केति मत्प्राप्ति-मार्ग-साधन-भेद-भक्ति-मात्रमप्यप्राप्य इत्यर्थः।

**निवर्त्तन्ते** निश्चयेनावर्त्तन्ते। क्व **मृत्युसंसारवर्त्मनि** मृत्यु-युक्तः संसारो मृत्यु-संसारः, तस्य वर्त्म नरक-

तिर्यगादि-प्राप्ति-मार्गः तस्मिन्नेव वर्त्तन्त इत्यर्थः।। ३ ।।

स्तुत्या अर्जुनमभिमुखीकृत्याह -

**मया ततमिदं सर्वं जगदव्यक्तमूर्त्तिना।**

**मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः।। ९.४ ।।**

इदं सर्वं जगद् अव्यक्तमूर्त्तिना मया ततम्। सर्वभूतानि मत्स्थानि (भवन्ति)। अहं तेषु न च अवस्थितः।। ४ ।।
मत्स्थानि - सप्तमी तत्पुरुषः। सर्वम्
[3]

मयेति। **मया** मम यः परो भावः तेन **ततं** व्याप्तं **सर्वम् इदं जगद् अव्यक्तमूर्त्तिना** न व्यक्ता मूर्त्तिः

स्वरूपं यस्य मम सोऽहम् अव्यक्तमूर्त्तिः, तेन मया, अव्यक्त-मूर्त्तिना करणागोचर-स्वरूपेणेत्यर्थः।

तस्मिन् मय्यव्यक्त-मूर्त्तौ स्थितानि **मत्स्थानि सर्वभूतानि** ब्रह्मादीनि स्तम्ब-पर्यन्तानि।

न हि निरात्मकं किञ्चिद् भूतं व्यवहारायावकल्पते।

---

[3] क्ष्म ददद्य ख्ध्द्धड्ड दध्ड्ढ्ढडद्वद्धड्डड्ढदड्ढड्ड डन्र द्यण्ड्ड ध्ड्ढत्ढ्ढण्द्य दढ द्यण्ड्ड ञ्ढ्ढठ्ठ्य . ग्लद. ख्न्त्त्ड्ढ ढड्डठ्ठ्यण्ड्ढ्ढ द्यण्ड्डन्र ञ्मठ्ठन्र. ज्ञ्ड्ढ ञ्मठ्ठन्र दद ध्ड्ढत्ढ्ढण्द्य ठ्ठ्य ठ्ठ्थ्थ थ्त्त्ड्ढ द्रदद्य त्ध्म ञ्छ्ध्द्धत्ड्ढड्ड डन्र द्यण्ड्ड ञ्थ्ठ्ठन्र.

अतो मत्स्थानि मयाऽऽत्मनाऽऽत्मवत्त्वेन स्थितानि।

अतो मयि स्थितानीत्युच्यन्ते। तेषां भूतानाम् अहमेवात्माइत्यतः तेषु स्थित इति मूढ-बुद्धीनामवभासते।

अतो ब्रवीमि **न** **चाहं** **तेषु** भूतेषु **अवस्थितः** मूर्त्तवत् संश्लेषाभावेन।

आकाशस्याप्यन्तरतमो ह्यहम्। न ह्यसंसर्गि वस्तु क्वचिद् आधेय-भावेनावस्थितं भवति।। ४ ।।

अत एव असंसर्गित्वं मम -

**न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्।**

**भूतभृन्न च भूतस्थो ममात्मा भूतभावनः।। ९.५ ।।**

भूतानि मत्स्थानि न च। मे ऐश्वरं योगं पश्य। भूतभृन्न च भूतस्थः। ममात्मा भूतभावनः।।

न चेति। **न** **च** **मत्स्थानि** **भूतानि** ब्रह्मादीनि।

**पश्य** मे **योगं** युक्तिं घटनं **मे** मम **ऐश्वरम्** ईश्वरस्येमम् ऐश्वरं योगमात्मनो याथात्म्यम् इत्यर्थः।

तथा च श्रुतिरसंसर्गित्वाद् असङ्गतां दर्शयति असङ्गो न हि सज्जते (बृ. ३.९.२६) इति।

इदं चाश्चर्यमन्यत् पश्य। **भूतभृद्** असङ्गोऽपि सन् भूतानि बिभर्त्ति **न** **च** **भूतस्थः** यथोक्तेन न्यायेन

दर्शितत्वाद् भूतस्थत्वानुपपत्तेः[4]। कथं पुनरुच्यते असौ ममात्मा इति।

विभज्य देहादि-संघातं तस्मिन्नहङ्कारमध्यारोप्य लोक-बुद्धिमनुसरन् व्यपदिशति **ममात्मा**[5] इति,

न पुनरात्मनः आत्माऽन्य इति लोकवदजानन्।

तथा **भूतभावनः** भूतानि भावयत्युत्पादयति वर्धयतीति वा भूत-भावनः।। ५ ।।

---

[4] अनुपपत्तेः दर्शितत्वाद् इत्यन्वयः।

[5] सङ्घादिविलक्षणमात्मानं लोकदृष्ट्या ममात्मेति व्यपदिशति।

यथोक्तेन श्लोकद्वयेन उक्तमर्थं दृष्टान्तेन उपपादयन् आह -

**यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान्।**

**तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय।। ९.६ ।।**

यथा आकाशस्थितः वायुः नित्यं सर्वत्रगः महान् तथा सर्वाणि भूतानि मत्स्थानि इति उपधारय।। ६ ।।

यथेति। **यथा** लोके **आकाशस्थितः** आकाशे स्थितः **नित्यं** सदा **वायुः** सर्वत्र गच्छतीति **सर्वत्रगो** **महान्** परिमाणतः **तथा** आकाशवत् सर्वगते **मयि** (**सर्वाणि भूतानि**) असंश्लेषेणैव **स्थितानि** **इति** एवम् **उपधारय** विजानीहि।। ६ ।।

एवं वायुः आकाशे इव मयि स्थितानि सर्वभूतानि स्थितिकाले तानि -

**सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।**

**कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्।। ९.७ ।।**

कौन्तेय सर्वभूतानि कल्पक्षये मामिकाम् प्रकृतिं यान्ति। कल्पादौ अहं पुनः तानि विसृजामि।। ७।।

सर्वेति। **सर्वभूतानि** **कौन्तेय** **प्रकृतिं** त्रिगुणात्मिकामपरां निकृष्टां **यान्ति** **मामिकां** मदीयां **कल्पक्षये** प्रलय-काले। **पुनः** भूयः **तानि** भूतान्युत्पत्ति-काले **कल्पादौ** **विसृजामि** उत्पादयामि **अहं** पूर्ववत्।। ७ ।।

एवमविद्यालक्षणम् -

**प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।**

**भूतग्राममिमं कृत्स्नम् अवशं प्रकृतेर्वशात्।। ९.८ ।।**

अहं स्वां प्रकृतिम् अवष्टभ्य प्रकृतेः वशात् अवशं इमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ।। ८।।

प्रकृतिमिति। **प्रकृतिं** **स्वां** स्वीयम् **अवष्टभ्य** वशीकृत्य **विसृजामि** **पुनः** **पुनः** प्रकृतितो जातं **भूतग्रामं** भूत-समुदायम् **इमं** वर्त्तमानं **कृत्स्नं** समस्तम्[6] **अवशम्** अस्वतन्त्रं अविद्यादि-दोषैः परवशीकृतं **प्रकृतेर्वशात्** स्वभाव-वशात्।। ८ ।।

[6] समग्रमिति वा।

तर्हि तस्य ते परमेश्वरस्य भूतग्राममिमं विषमं विदधतः तन्निमित्ताभ्यां धर्माधर्माभ्यां -

**न च मां तानि कर्माणि निबध्नन्ति धनञ्जय।**

**उदासीनवदासीनमसक्तं तेषु कर्मसु।। ९.९ ।।**

धनञ्जय उदासीनवदासीनं तेषु कर्मसु असक्तं मां तानि कर्माणि च न निबध्नन्ति । ।। ९ ।।

न चेति। **न** **च** **माम्** ईश्वरं **तानि** भूत-ग्रामस्य विषम-विसर्ग-निमित्तानि **कर्माणि** **निबध्नन्ति** **धनञ्जय**।

तत्र कर्मणामसम्बन्धित्वे [7] कारणमाह - **उदासीनवदासीनं** यथा उदासीन उपेक्षकः कश्चित् तद्वदासीनम्, आत्मनोऽविक्रियत्वाद् **असक्तं** फलासङ्ग-रहितम् अभिमान-वर्जितम् अहं करोमि इति **तेषु** **कर्मसु**। अतोऽन्यस्यापि कर्तृत्वाभिमानाभावः फलासङ्गाभावश्चासम्बन्ध-कारणम्। अन्यथा कर्मभिर्बध्यते मूढः कोश-कारवदिति अभिप्रायः।। ९ ।।

---

[7] असम्बद्धत्वे इति व्।

तत्र (सर्गव्यापारे) भूतग्राममिमं विसृजामि (गी ९.८) उदासीनवदासीनम् (गी ९.९) इति च विरुद्धमुच्यते

इति तत्परिहारार्थमाह -

**मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।**

**हेतुनाऽनेन कौन्तेय जगद्विपरिवर्त्तते।। ९.१० ।।**

मया अध्यक्षेण सता प्रकृतिः सचराचरं सूयते । कौन्तेयअनेन हेतुना जगद्विपरिवर्त्तते।। १० ।।

मयेति। **मया** सर्वतो दृशि-मात्र-स्वरूपेणाविक्रियात्मना **अध्यक्षेण** मम माया त्रि-गुणात्मिका अविद्या-

लक्षणा **प्रकृतिः** **सूयते** उत्पादयति **सचराचरं** जगत्।

तथा च मन्त्र-वर्णः एको देवः सर्व-भूतेषु गूढः सर्व-व्यापी सर्व-भूतान्तरात्मा।

कर्माध्यक्षः सर्व-भूताधिवासः साक्षी चेता केवलो निर्गुणश्च (श्वे ६.११) इति।

**हेतुना** निमित्तेन **अनेन** अध्यक्षत्वेन **कौन्तेय** **जगत्** सचराचरं व्यक्ताव्यक्तात्मकं **विपरिवर्त्तते** सर्वावस्थासु।

दृशि-कर्मत्वापत्ति-निमित्ता हि जगतः सर्वा प्रवृत्तिः अहमिदं भोक्ष्ये पश्यामीदम् शृणोमीदम् सुखमनुभवामि दुःखमनुभवामि तदर्थमिदं करिष्यामि एतदर्थमिदं करिष्ये इदं ज्ञास्यामि इत्याद्या अवगति-निष्ठा अवगत्यवसानैव। यो अस्याध्यक्षः परमे व्योमन् (तै.ब्रा २.८.९)[8] इत्यादयश्च मन्त्रा एतमर्थं दर्शयन्ति। ततश्चैकस्य देवस्य सर्वाध्यक्ष-भूत-चैतन्य-मात्रस्य परमार्थतः सर्व-भोगानभिसम्बन्धिनोऽन्यस्य चेतनान्तरस्य अभावे भोक्तुरन्यस्याभावात् किंनिमित्तेयं सृष्टिः इत्यत्र प्रश्न-प्रतिवचने अनुपन्ने को अद्धा वेद क इह प्रवोचत् कुतः आजाता कुत इयं विसृष्टिः (तै.ब्रा २.८.९) इत्यादि-मन्त्र-वर्णेभ्यः। दर्शितं च भगवता अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः (गी ५.१५) इति।। १० ।।

---

[8] ऋ १०.१२९.६, ७ इत्यपि दत्तं क्वचित्।

एवं मां नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वजन्तूनामात्मानमपि सन्तम् -

**अवजानन्ति मां मूढाः मानुषीं तनुमाश्रितम्।**

**परं भावमजानन्तो मम भूतमहेश्वरम्।। ९.११ ।।**

मूढाः मम भूतमहेश्वरं परं भावमजानन्तः (सन्तः) मानुषीं तनुमाश्रितं माम् अवजानन्ति ।। ११

अवजानन्तीति। **अवजानन्ति** अवज्ञां परिभवं कुर्वन्ति **मां** **मूढाः** अविवेकिनः **मानुषीं** मनुष्य-सम्बन्धिनीं **तनुं** देहम् **आश्रितं** मनुष्य-देहेन व्यवहरन्तमित्येतत्।

**परं** प्रकृष्टं **भावं** परमात्म-तत्त्वमाकाश-कल्पमाकाशादप्यन्तरतमम् **अजानन्तः** **मम** **भूतमहेश्वरं** सर्व-भूतानां महान्तमीश्वरं स्वात्मानम्। ततश्च तस्य ममावज्ञान-भावनेन आहता वराकाः[9] ते।। ११ ।।

---

[9] नीचाः।

कथम्।

**मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः।**

**राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः।। ९.१२ ।।**

मोघाशा मोघकर्माणः मोघज्ञाना विचेतसः। राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः।। १२।।

मोघाशा इति। **मोघाशाः** वृथा आशा आशिषो येषां ते मोघाशाः।

तथा **मोघकर्माणः** यानि चाग्निहोत्रादीनि तैरनुष्ठीयमानानि कर्माणि तानि च तेषां भगवत्परिभवात् स्वात्म-

भूतस्यावज्ञानात् मोघान्येव निष्फलानि कर्माणि भवन्तीति मोघ-कर्माणः।

तथा **मोघ-ज्ञानाः** निष्फल-ज्ञाना ज्ञानमपि तेषां निष्फलमेव स्यात्।

**विचेतसः** विगत-विवेकाश्च ते भवन्तीत्यभिप्रायः।

किञ्च ते भवन्ति **राक्षसीं** रक्षसां प्रकृतिं स्वभावम् **आसुरीम्** असुराणां **च प्रकृतिं मोहिनीं** मोह-करीं देहात्म-वादिनीं **श्रिताः** आश्रिताः छिन्द्धि, भिन्द्धि, पिब, खाद, परस्वमपहर इत्येवं-वदन-शीलाः क्रूर-कर्माणो भवन्ति इत्यर्थः।

असुर्या नाम ते लोकाः (ई. ३) इति श्रुतेः।। १२ ।।

ये पुनः श्रद्दधाना भगवद्भक्ति-लक्षणे मोक्ष-मार्गे प्रवृत्ताः -

**महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः।**

**भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्।। ९.१३ ।।**

पार्थ दैवीं प्रकृतिम् आश्रिताः महात्मानः तु मां भूतादिम् अव्ययं ज्ञात्वा अनन्यमनसो भजन्ति ।। १३

महात्मान इति। **महात्मानस्तु** अक्षुद्र-चित्ताः **माम्** ईश्वरं **पार्थ** **दैवीं** देवानां **प्रकृतिं** शम-दम-दया-श्रद्धादि-लक्षणाम् **आश्रिताः** सन्तो **भजन्ति** सेवन्ते **अनन्यमनसः** अनन्य-चित्ताः **ज्ञात्वा** **भूतादिं** भूतानां वियदादीनां प्राणिनां चादिं कारणम् **अव्ययम्**।। १३ ।।

कथम्

**सततं कीर्त्तयन्तो मां यतन्तश्च दृढव्रताः।**

**नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते।। ९.१४ ।।**

मां (भक्त्या) सततं कीर्त्तयन्तः (भक्त्या) यतन्तः (भक्त्या) नमस्यन्तः च दृढव्रताः नित्ययुक्ताः च (सन्तः) मां भक्त्या उपासते।। १४

सततमिति। **सततं** सर्वदा भगवन्तं ब्रह्म-स्वरूपं **मां** **कीर्त्तयन्तो** **यतन्तश्च** इन्द्रियोपसंहार-शम-दम-दयाऽहिंसादि-लक्षणैर्धर्मैः प्रयतन्तश्च **दृढव्रताः** दृढं स्थिरम् अचाल्यं व्रतं येषां ते दृढ-व्रताः **नमस्यन्तश्च** **मां** हृदयेशयमात्मानं **भक्त्या** **नित्ययुक्ताः** सन्तः **उपासते** सेवन्ते।। १४ ।।

ते केन केन प्रकारेण उपासत इत्युच्यते -

**ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते।**

**एकत्वेन पृथक्त्वेन बहुधा विश्वतो मुखम्।। ९.१५ ।।**

अन्ये च ज्ञानयज्ञेन अपि मां यजन्तो एकत्वेन पृथक्त्वेन बहुधा विश्वतो मुखम् उपासते ।। १५ ।।
अन्ये च ज्ञानयज्ञेन अपि यजन्तो एकत्वेन (स्थितम्) पृथक्त्वेन (स्थितम्) बहुधा (स्थितम्) विश्वतो मुखं मां उपासते।

ज्ञानयज्ञेनेति। **ज्ञानयज्ञेन** ज्ञानमेव भगवद्विषयं यज्ञः तेन ज्ञान-यज्ञेन **यजन्तः** पूजयन्तो **माम्** ईश्वरं **चाप्यन्ये** अन्यामुपासनां परित्यज्य **उपासते**। तच्च ज्ञानम् **एकत्वेन** एकमेव परं ब्रह्म इति परमार्थ-दर्शनेन यजन्त उपासते। केचिच्च **पृथक्त्वेन** आदित्य-चन्द्रादि-भेदेन स एव भगवान् विष्णुरादित्यादि-रूपेणावस्थितः इत्युपासते। केचिद् बहुधा अवस्थितः स एव भगवान् सर्वतो-मुखो विश्वतोमुखो विश्व-रूपः इति तं विश्व-रूपं सर्वतोमुखं **बहुधा** बहु-प्रकारेण **उपासते**।। १५ ।।

यदि बहुभिः प्रकारैः उपासते कथं त्वामेव उपासते इत्यत आह -

**अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम्।**

**मन्त्रोऽहमहमेवाज्यम् अहमग्निरहं हुतम्।। ९.१६ ।।**

अहं क्रतुः। अहं यज्ञः। अहं स्वधा। अहम् औषधम्। अहं मन्त्रः। अहमेव आज्यम्। अहमग्निः अहं हुतम्।। १६।।

अहमिति। **अहं** **क्रतुः** श्रौत-कर्म-भेदोऽहमेव। **अहं यज्ञः** स्मार्त्तः। किञ्च **स्वधा** अन्नम् **अहं** पितृभ्यो यद्दीयते। **अहमौषधं** सर्व-प्राणिभिर्यदद्यते तद् औषध-शब्द-वाच्यं व्रीहि-यवादि-साधारणम्।

अथवा स्वधेति सर्व-प्राणि-साधारणमन्नम्, औषधमिति व्याध्युप-शमार्थं भेषजम्।

**मन्त्रोऽहं** येन पितृभ्यो देवताभ्यश्च हविर्दीयते।

**अहमेवाज्यं** हविश्च। **अहमग्निः** यस्मिन् हूयते हविः सोऽग्निरहम्। **अहं** **हुतं** हवन-कर्म च।। १६ ।।

किंच -

**पिताहमस्य जगतः माता धाता पितापहः।**

**वेद्यं पवित्रमोङ्कारः ऋक्साम यजुरेव च।। ९.१७ ।।**

अहम् अस्य जगतः पिता माता धाता पितापहः वेद्यं पवित्रम् ओङ्कारः ऋक्साम यजुरेव च।। १७ ।।

**पिता** जनयिता अहमस्य जगतः। **माता** जनयित्री। **धाता** कर्म-फलस्य प्राणिभ्यो विधाता।

**पितापहः** पितुः पिता (अजः)।

**वेद्यं** वेदितव्यम् (आत्मा वा अरे.. वेदैश्च सर्वैः अहमेव वेद्यः) **पवित्रं** पावनम् ओङ्कारः।

ऋके साम यजुरेव च।। १७ ।।

किंच -

**गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत्।**

**प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम्।। ९.१८ ।।**

गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत्। प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम्।। १८

गतिरिति। **गतिः** कर्म-फलम्। **भर्त्ता** पोष्टा। **प्रभुः** स्वामी। **साक्षी** प्राणिनां कृताकृतस्य। **निवासः** यस्मिन् प्राणिनो निवसन्ति। **शरणम्** आर्त्तानां प्रपन्नानाम् आर्त्ति-हरः **सुहृत्** प्रत्युपकारानपेक्षः सन्नुपकारी **प्रभवः** उत्पत्तिर्जगतः। **प्रलयः** प्रलीयतेऽस्मिन्निति। तथा **स्थानं** तिष्ठत्यस्मिन्निति। **निधानं** निक्षेपः कालान्तरोपभोग्यं प्राणिनाम्। **बीजं** प्ररोह-कारणं प्ररोह-धर्मिणाम्। **अव्यय**[10] यावत्संसार-भावित्वाद् अव्ययम्।

[10] अव्ययं बीजमिति गृहीत्वा व्याख्यातम्।

न ह्यबीजं किञ्चित् प्ररोहति। नित्यं च प्ररोह-दर्शनाद् बीज-सन्ततिर्न व्येतीति गम्यते।। १८ ।।

किंच -

**तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च।**

**अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन।। ९.१९ ।।**

तपामीति। **तपाम्यहम्** आदित्यो भूत्वा कैश्चिद्रश्मिभिरुल्बणैः। **अहं** **वर्षं** कैश्चिद् रश्मिभिः उत्सृजामि। उत्सृज्य पुनः **निगृह्णामि** कैश्चिद्रश्मिभिरष्टभिर्मासैः पुनः **उत्सृजामि** प्रावृषि। **अमृतं** **चैव** देवानां। **मृत्युश्च** मर्त्यानाम्। **सद्** यस्य यत्सम्बन्धितया विद्यमानं तत्। तद्विपरीतम् **असत्** च एव **अहमर्जुन**। न पुनरत्यन्तमेवासद् भगवान् स्वयम्। कार्य-कारणे वा सदसती। ये पूर्वोक्तैरनुवृत्ति[11]-प्रकारैरेकत्व-पृथक्त्वादि-विज्ञानैर्यज्ञैर्मां पूजयन्त उपासते ज्ञानविदस्ते यथा-विज्ञानं मामेव प्राप्नुवन्ति।। १९ ।।

---

[11] निवृत्तिरिति पाठान्तरम्।

ये पुनः अज्ञाः कामकामाः -

**त्रैविद्या मां सोमपाः पूतपापाः यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।**

**ते पुण्यमासाद्य सुरेन्द्रलोकं अश्नन्ति दिव्यान् दिवि देवभोगान्।। ९.२० ।।**

त्रैविद्येति। **त्रैविद्या** ऋग्यजुः-सामविदो **मां** वस्वादि-देव-रूपिणं **सोमपाः** सोमं पिबन्तीति सोमपाः, तेनैव सोम-पानेन **पूतपापाः** शुद्ध-किल्बिषाः **यज्ञैः** अग्निष्टोमादिभिः **इष्ट्वा** पूजयित्वा **स्वर्गतिं** स्वर्ग-गमनं स्वरेव गतिः स्वर्गतिस्तां **प्रार्थयन्ते**। **ते** च **पुण्यं** पुण्य-फलम् **आसाद्य** संप्राप्य **सुरेन्द्रलोकं** शत-क्रतोः स्थानं **अश्नन्ति** भुञ्जन्ते **दिव्यान्** दिवि भवान् अप्राकृतान् **देवभोगान्** देवानां भोगान्।। २० ।।

**ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति।**

**एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते।। ९.२१ ।।**

ते तमिति। **ते** **तं** **भुक्त्वा** **स्वर्गलोकं** **विशालं** विस्तीर्णं **क्षीणे** **पुण्ये** **मर्त्यलोकम्** इमं **विशन्ति** आविशन्ति। **एवं** यथोक्तेन प्रकारेण **त्रयीधर्मं** केवलं वैदिकं कर्म **अनुप्रपन्नाः** **गतागतं** गतं चागतं च गतागतं गमनागमनं **कामकामाः** कामान् कामयन्त इति काम-कामाः **लभन्ते** गतागतमेव। न तु स्वातन्त्र्यं क्वचिल्लभन्त इत्यर्थः।। २१ ।।

ये पुनर्निष्कामाः सम्यग्दर्शिनः -

**अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।**

**तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।। ९.२२ ।।**

अनन्या इति। **अनन्याः** अपृथग्भूताः परं देवं नारायणमात्मत्वेन गताः सन्तः **चिन्तयन्तो** **मां** **ये** **जनाः** संन्यासिनः **पर्युपासते** **तेषां** परमार्थ-दर्शिनां **नित्याभियुक्तानां** सतताभियोगिनां **योगक्षेमं** योगोऽप्राप्तस्य प्रापणं, क्षेमस्तद्रक्षणं तदुभयं **वहामि** प्रापयामि **अहम्**। ज्ञानी त्वात्मैव मे मतम् (गी ७.१८) स च मम प्रियः (गी ७.१७) यस्मात् तस्मात् ते ममात्मभूताः प्रियाश्चेति।

**आक्षेपः**

ननु अन्येषामपि भक्तानां योग-क्षेमं वहत्येव भगवान्।

**समाधानम्**

सत्यं वहत्येव। किन्त्वयं विशेषः। अन्ये ये भक्तास्ते स्वात्मार्थं स्वयमपि योग-क्षेममीहन्ते, अनन्य-

दर्शिनस्तु नात्मार्थं योग-क्षेममीहन्ते। न हि ते जीविते मरणे वा आत्मनो गृद्धिं[12] कुर्वन्ति, केवलमेव

भगवच्छरणाः ते। अतो भगवानेव तेषां योग-क्षेमं वहतीति।। २२ ।।

[12] गृधिमिति वा।

ननु अन्या अपि देवतास्त्वमेव चेत् तद्भक्ताश्च त्वामेव यजन्ते। सत्यमेवम् -

**येप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः।**

**तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्।। ९.२३ ।।**

**देवतासु भक्ताः देवताभक्ताः।**

य इति। **येऽप्यन्यदेवताभक्ताः** अन्यासु देवतासु भक्ता अन्य-देवता-भक्ताः सन्तः **यजन्ते** पूजयन्ति

**श्रद्धया** आस्तिक्य-बुद्ध्या **अन्विताः** अनुगताः **तेऽपि** **मामेव** **कौन्तेय** **यजन्त्यविधिपूर्वकम्**

अविधिरज्ञानं तत्पूर्वकमज्ञान-पूर्वकं यजन्त इत्यर्थः।। २३ ।।

कस्मात्ते अविधिपूर्वकं यजन्ते इत्युच्यते। यस्मात् -

**अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।**

**न तु मामभिजानन्ति तत्त्वेनात□यवन्ति ते।। ९.२४ ।।**

अहमिति। **अहं** **हि** **सर्वयज्ञानां** श्रौतानां स्मार्त्तानां च सर्वेषां यज्ञानां देवतात्मत्वेन **भोक्ता** **च** **प्रभुरेव** **च**।

मत्स्वामिको हि यज्ञो अधियज्ञोऽहमेवात्र (गी ८.४) इति ह्युक्तम्।

तथा **न** **तु** **मामभिजानन्ति** **तत्त्वेन** यथावत्।

अतश्चाविधिपूर्वकम् इष्ट्वा याग-फलात् **च्यवन्ति** प्रच्यवन्ते ते।। २४ ।।

येऽप्यन्यदेवताभक्तिमत्वेन अविधिपूर्वकं यजन्ते तेषामपि यागफलमवश्यंभावि। कथम् -

**यान्ति देवव्रता देवान् पितॄन्यान्ति पितृव्रताः।**

**भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम्।। ९.२५ ।।**

**देवेषु व्रतं नियमः भक्तिः च येषां ते।**

यान्तीति। **यान्ति** गच्छन्ति **देवव्रता**ः देवेषु व्रतं नियमो भक्तिश्च येषां ते देव-व्रताः **देवान्** यान्ति।

**पितॄन्** अग्निष्वात्तादीन् **यान्ति** **पितृव्रताः** श्राद्धादि-क्रिया-पराः पितृ-भक्ताः।

**भूतानि** विनायक-मातृ-गण-चतुर्भगिन्यादीनि **यान्ति** **भूतेज्याः** भूतानां पूजकाः।

**यान्ति** **मद्याजिनो** मद्यजन-शीला वैष्णवा माम् एव। समानेऽप्यायासे मामेव न भजन्ते, अज्ञानात्।

तेन तेऽल्प-फलभाजो भवन्तीत्यर्थः।। २५ ।।

न केवलं मद्भक्तानामनावृत्ति-लक्षणमनन्त-फलं सुखाराधनश्चाहम्। कथम् -

**पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।**

**तदहं भक्त्युपहृतम् अश्नामि प्रयतात्मनः।। ९.२६ ।।**

पत्रमिति। **पत्रं** **पुष्पं** **फलं** **तोयम्** उदकं **यो** **मे** मह्यं **भक्त्या** **प्रयच्छति** **तदहं** पत्रादि भक्त्योपहृतं भक्ति-पूर्वकं प्रापितं **भक्त्युपहृतम्** **अश्नामि** गृह्णामि **प्रयतात्मनः** शुद्ध-बुद्धेः।। २६ ।।

यत एवमतः

**यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।**

**यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्।। ९.२७ ।।**

यदिति। **यत्करोषि** स्वतः प्राप्तं **यदश्नासि** **यच्च** **जुहोषि** हवनं निर्वर्त्तयसि श्रौतं स्मार्त्तं वा **यद्ददासि** प्रयच्छसि ब्राह्मणादिभ्यो हिरण्यान्नाज्यादि **यत्तपस्यसि** तपश्चरसि **कौन्तेय** **तत्कुरुष्व** **मदर्पणं** मत्समर्पणम्।। २७ ।।

एवं कुर्वतस्तव यद्भवति तच्छृणु -

**शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः।**

**संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि।। ९.२८ ।।**

शुभाशुभे इष्टानिष्टे फले येषां तत्। युज समाधौ ४ आ.प भावादौ घञ् कुत्वम्। युजिर् योगे ७ उ.प युज संयमने १० आधृषाय उ.प

शुभेति। **शुभाशुभफलैः** शुभाशुभे इष्टानिष्ट-फले येषां तानि शुभाशुभ-फलानि कर्माणि तैः शुभाशुभ-फलैः

**कर्मबन्धनैः** कर्माण्येव बन्धनानि तैः कर्म-बन्धनैः **एवं** मत्समर्पणं कुर्वन् **मोक्ष्यसे**।

सोऽयं संन्यास-योगो नाम संन्यासश्च असौ मत्समर्पणतया कर्मत्वाद् योगश्चासौ इति तेन संन्यास-

योगेन युक्त आत्मा अन्तःकरणं यस्य स त्वं **संन्यासयोगयुक्तात्मा** सन् **विमुक्तः** कर्म-बन्धनैर्जीवन्नेव,

पतिते चास्मिन् शरीरे **माम्** **उपैष्यसि** आगमिष्यसि।। २८।।

रागद्वेषवांस्तर्हि भगवान् यतो भक्तान् अनुगृह्णाति नेतरान् इति । तत्र -

**समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।**

**ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्।। ९.२९ ।।**

सम इति। **समः** तुल्योऽहं **सर्वभूतेषु**। **न** **मे** **द्वेष्योऽस्ति** **न** **प्रिय**ः। अग्निवदहम्।

दूरस्थानां यथाग्निः शीतं नापनयति, समीपमुपसर्पतामपनयति तथाऽहं भक्तान् अनुगृह्णामि, नेतरान्।

**ये** **भजन्ति** **तु** **माम्** ईश्वरं **भक्त्या** **मयि** **ते** स्वभावत एव, न मम राग-निमित्तं वर्त्तन्ते।

**तेषु** **चाप्यहं** स्वभावत एव वर्त्ते, नेतरेषु। नैतावता तेषु द्वेषो मम।। २९ ।।

श्रृणु मद्भक्तेः माहात्म्यम् -

**अपि चेत् सुदुराचारो भजते मामनन्यभाक्।**

**साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः।। ९.३० ।।**

अपि चेत् सुदुराचारः भजते मामनन्यभाक्। साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः।। ३०

अपीति। **अपि** **चेत्** यद्यपि **सुदुराचारः** सुष्ठु दुराचारोऽतीव कुत्सिताचारोऽपि **भजते** **माम्** **अनन्यभाग्** अनन्य-भक्तिः सन् **साधुरेव** सम्यग्वृत्त एव **स** **मन्तव्यः** ज्ञातव्यः **सम्यग्** यथावद् **व्यवसितो** **हि** **सः** यस्मात् साधु-निश्चयः सः।। ३० ।।

उत्सृज्य च बाह्यां दुराचारताम् अन्तःसम्यग् व्यवसायसामर्थ्यात् -

**क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।**

**कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति।। ९.३१ ।।**

**धर्मे आत्मा अन्तःकरणं यस्य।**

क्षिप्रमिति। **क्षिप्रं** शीघ्रं **भवति** **धर्मात्मा** धर्म-चित्त एव **शश्वद्** नित्यं **शान्तिं** चोपशमं **निगच्छति** प्राप्नोति।

श्रृणु परमार्थं **कौन्तेय** **प्रतिजानीहि** निश्चितां प्रतिज्ञां कुरु **न** **मे** मम **भक्तः** मयि समर्पितान्तरात्मा मद्भक्तो न **प्रणश्यति** इति।। ३१ ।।

किंच -

**मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।**

**स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्।। ९.३२ ।।**

मामिति। **मां** **हि** यस्मात् **पार्थ** **व्यपाश्रित्य** मामाश्रयत्वेन गृहीत्वा **येऽपि** **स्युः** भवेयुः **पापयोनयः** पापा

योनिर्येषां ते पाप-योनयः पाप-जन्मानः।

के ते इत्याह - **स्त्रियो** **वैश्यास्तथा** **शूद्राः**। **तेऽपि** **यान्ति** गच्छन्ति **परां** प्रकृष्टां **गतिम्**।। ३२ ।।

**किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।**

**अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्।। ९.३३ ।।**

किं पुनरिति। **किं** **पुनर्ब्राह्मणाः** **पुण्याः** पुण्य-योनयो **भक्ताः** **राजर्षयः** **तथा** राजानश्च ते ऋषयश्चेति राजर्षयः। यत एवमतः **अनित्यं** क्षण-भङ्गुरम् **असुखं** च सुख-वर्जितम् **इमं** **लोकं** मनुष्य-लोकं **प्राप्य** पुरुषार्थ-साधनं दुर्लभं मनुष्यत्वं लब्ध्वा **भजस्व** सेवस्व **माम्**।। ३३ ।।

कथम् -

**मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।**

**मामेवैष्यस्यसि[13] युक्त्वैवम् आत्मानं मत्परायणः।। ९.३४ ।।**

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः।।

मन्मना इति। मयि वासुदेवे मनो यस्य तव स त्वं **मन्मना** **भव**। तथा **मद्भक्तो** **भव**। **मद्याजी** मद्यजन-शीलो **भव**। **माम्** एव च **नमस्कुरु**। **मामेव** ईश्वरम् **एष्यसि** आगमिष्यसि **युक्त्वा** समाधाय चित्तम्। **एवम्** आत्मानम्, अहं हि सर्वेषां भूतानामात्मा परा च गतिः परमयनं तं मामेवंभूतमेष्यसीत्यतीतेन सम्बन्धः **मत्परायणः** सन्नित्यर्थः। ३४।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
श्रीमद्भगवद्गीताभाष्ये नवमोऽध्यायः।।

---

13 गीता १८.६५ मन्मना...एष्यसि - समानश्लोकः। ततः परं सत्यं ते प्रतिजाने प्रियोऽसि मे।।

# अध्यायः १०

# विभूतियोगः

सप्तमे अध्याये भगवतः तत्वं विभूतयः च प्रकाशिताः नवमे च। अथ इदानीं येषु येषु भावेषु चिन्त्यः

भगवान् ते ते भावा वक्तव्याः तत्वं च भगवतो वक्तव्यम् उक्तमपि दुर्विज्ञेयत्वाद् इति अतः -

**श्रीभगवानुवाच।**

**भूय एव महाबाहो श्रृणु मे परमं वचः।**

**यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकम्यया।। १०.१ ।।**

*Sri Bhagavan* said:
Indeed, O! Mighty armed *Arjuna*, for your benefit, listen again to My words, which reveal the limitless, which I will tell you, who is pleased (by My words). 1

भूय इति। **भूय** **एव** भूयः पुनर्हे **महाबाहो** **श्रृणु** **मे** मदीयं **परमं** प्रकृष्टं निरतिशय-वस्तुनः प्रकाशकं **वचः**

वाक्यं **यत्** परमं **ते** तुभ्यं **प्रीयमाणाय** मद्वचनात् प्रीयसे त्वमतीवामृतमिव पिबंस्ततो **वक्ष्यामि**

**हितकाम्यया** हितेच्छया।। १।।

किमर्थंमहं वक्ष्यामि इत्यत आह -

**न मे विदुः सुरगणाः प्रभवं न महर्षयः।**

**अहमादिर्हि देवानां महर्षीणां च सर्वशः।। १०.२ ।।**

The whole host of gods do not know My glory/coming into being as this world, nor do the sages because I am the cause of all the gods and sages. 2

न म इति। **न** **मे** **विदुः** न जानन्ति **सुरगणाः** ब्रह्मादयः।

किं ते न विदुः मम **प्रभवं** प्रभावं प्रभु-शक्त्यतिशयम्। अथवा प्रभवं प्रभवनम् उत्पत्तिम्।

**न** अपि **महर्षयः** भृग्वादयो विदुः।

कस्मात् ते न विदुरित्युच्यते - **अहमादिः** कारणं **हि** यस्माद् **देवानां** **महर्षीणां** **च** **सर्वशः** सर्व-

प्रकारैः।। २ ।।

किंच

**यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।**

**असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते।। १०.३ ।।**

He who knows Me as the one who is unborn (not an effect) and beginningless (not a cause), the limitless Lord of the people/world, he among the mortals, being no longer deluded, is released from all *punya* and *papa*.3

य इति। **यो** **माम्** **अजम्** **अनादिं** **च** यस्मादहमादिर्देवानां महर्षीणां च, न ममान्य आदिः विद्यते।

अतोऽहमजोऽनादिश्च। अनादित्वमजत्वे हेतुः।

तं मामजमनादिं च यो **वेत्ति** विजानाति **लोकमहेश्वरम्** लोकानां महान्तमीश्वरं तुरीयमज्ञान-तत्कार्य-

वर्जितम् **असंमूढः** सम्मोह-वर्जितः **स** **मर्त्येषु** मनुष्येषु **सर्वपापैः** सर्वैः पापैः मतिपूर्वामतिपूर्वकृतैः

**प्रमुच्यते** प्रमोक्ष्यते।। ३ ।।

इतश्चाहं महेश्वरो लोकानाम् -

**बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः।**

**सुखं दुःखं भवोऽभावो भयं चाभयमेव च।। १०.४ ।।**

बुद्धिरिति। **बुद्धिः** अन्तःकरणस्य सूक्ष्माद्यर्थावबोधन-सामर्थ्यम्। तद्वन्तं बुद्धिमानिति हि वदन्ति।

**ज्ञानम्** आत्मादि-पदार्थानामवबोधः। **असम्मोहः** प्रत्युत्पन्नेषु बोद्धव्येषु विवेक-पूर्विका प्रवृत्तिः।

**क्षमा** आक्रुष्टस्य ताडितस्य वा अविकृत-चित्तता।

**सत्यं** यथा-दृष्टस्य यथा-श्रुतस्य चात्मानुभवस्य पर-बुद्धि-संक्रान्तये तथैवोच्चार्यमाणा वाक् सत्यमुच्यते।

**दमः** बाह्येन्द्रियोपशमः। **शमः** अन्तःकरणस्योपशमः। **सुखम्** आह्लादः। **दुःखं** संतापः। **भवः** उद्भवः।

**अभावः** तद्विपर्ययः। **भयं** **च** त्रासः। **अभयम्** **एव** **च** तद्विपरीतम्।। ४ ।।

**अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः।**

**भवन्ति भावा भूतानां मत्त एव पृथग्विधाः।। १०.५ ।।**

The capacity to understand, knowledge, freedom from delusion, accommodation/composure, truthfulness, restraint in behaviour, mastery over the ways of thinking, pleasure, creation, destruction, fear, and fearlessness, and further, harmlessness, equanimity, satisfaction, religious discipline, charity, fame, ill-fame-these many different things of living beings-are all from Me alone. 4, 5

अहिंसेति। **अहिंसा** अपीडा प्राणिनाम्। **समता** सम-चित्तता। **तुष्टिः** संतोषः पर्याप्त-बुद्धिर्लाभेषु।

**तपः** इन्द्रिय-संयम-पूर्वकं शरीर-पीडनम्। **दानं** यथा-शक्ति संविभागः।

**यशः** धर्म-निमित्ता कीर्त्तिः। **अयशः** त्वधर्म-निमित्ताऽकीर्त्तिः।

**भवन्ति** **भावाः** यथोक्ताः बुद्ध्यादयः **भूतानां** प्राणिनां **मत्त** **एव** ईश्वरात् **पृथग्विधाः** नाना-विधाः स्व-

कर्मानु-रूपेण।। ५ ।।

किं च ।

**महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा।**

**मद्भावा मानसा जाता येषां लोक इमाः प्रजाः।। १०.६ ।।**

The seven *rsis* of long ago as well as the four *manus* who have their minds resolved in Me, are born of My mind, and of these are all these living beings in the world. 6

महर्षय इति। **महर्षयः** **सप्त** भृग्वादयः[14]। **पूर्वे** अतीत-काल-सम्बन्धिनः।

**चत्वारो** **मनवः** **तथा** सावर्णा इति प्रसिद्धाः। ते च **मद्भावाः** मद्गत-भावना वैष्णवेन सामर्थ्येनोपेताः।

**मानसाः** मनसैवोत्पादिताः। मया **जाताः** उत्पन्नाः।

**येषां** मनूनां महर्षीणां च सृष्टिः **लोके** **इमाः** स्थावर-जङ्गमाः **प्रजाः**।। ६ ।।

[14] भृगुं मरीचिमत्रिं च पुलस्त्यं पुलहं क्रतुं। वसिष्ठं च..।। इति।

**एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः।**

**सोऽविकम्पेन योगेन युज्यते नात्र संशयः।। १०.७ ।।**

The one who knows this glory of Mine and My connection with that in reality, he is endowed with unshaken vision. There is no doubt about this. 7

एतामिति। **एतां** यथोक्तां **विभूतिं** विस्तारं **योगं** **च** युक्तिं चाऽऽत्मनो घटनम्।

अथवा योगैश्वर्यसामर्थ्यं सर्वज्ञत्वं योगजं योग उच्यते।

**मम** मदीयं योगं **यो** **वेत्ति** **तत्त्वतः** तत्त्वेन यथावदित्येतत्।

**सः** **अविकम्पेन** अप्रचलितेन **योगेन** सम्यग्दर्शन-स्थैर्य-लक्षणेन **युज्यते** सम्बध्यते **नात्र** **संशयः**

नास्मिन्नर्थे संशयोऽस्ति।। ७ ।।

कीदृशेन अविकम्पेन योगेन युज्यते इति उच्यते -

**अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते।**

**इति मत्वा भजन्ते मां बुधा भावसमन्विताः।। १०.८ ।।**

I am the creator of everything and because of Me everything is sustained. Thus knowing, the wise men endowed with vision gain Me. 8

अहमिति। **अहं** परं ब्रह्म वासुदेवाख्यं **सर्वस्य** जगतः **प्रभवः** उत्पत्तिः **मत्तः** एव स्थिति-नाश-क्रिया-फलोपभोग-लक्षणं विक्रिया-रूपं **सर्वं** जगत् **प्रवर्त्तते** **इति** एवं **मत्वा** **भजन्ते** सेवन्ते **मां** **बुधाः** अवगत-तत्त्वार्थाः **भावसमन्विताः** भावो भावना, परमार्थ-तत्वाभि-निवेशः तेन समन्विताः संयुक्ता इत्यर्थः।। ८

।।

किं च -

**मच्चित्ताः मद्गतप्राणा बोधयन्तः परस्परम्।**

**कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च।। १०.९ ।।**

Those whose minds are in Me, whose living is resolved in Me, teaching one another and always talking about Me, they are (always) satisfied and they revel (always). 9

मच्चित्ता इति। **मच्चित्ताः** मयि चित्तं येषां ते मच्चित्ताः **मद्गतप्राणाः** मां गताः प्राप्ताः चक्षुरादयः प्राणा

येषां ते मद्गत-प्राणा मय्युपसंहृत-करणा इत्यर्थः। अथवा मद्गत-प्राणा मद्गत-जीवना इत्येतत्।

**बोधयन्तः** अवगमयन्तः **परस्परम्** अन्योन्यं **कथयन्तः** ज्ञान-बल-वीर्यादि-धर्मैर्विशिष्टं **मां**,

**तुष्यन्ति** **च** परितोषमुपयान्ति **रमन्ति** **च** रतिं च प्राप्नुवन्ति प्रिय-सङ्गत्येव।। ९ ।।

ये यथोक्तप्रकारैः भजन्ते मां भक्ताः सन्तः -

**तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं।**

**ददामि बुद्धियोगं तं येन माम् उपयान्ति ते।। १०.१० ।।**

For those who are always committed to Me, seeking Me with love, I give that vision whereby they reach Me. 10

तेषामिति। **तेषां** **सततयुक्तानां** नित्याभि-युक्तानां निवृत्त-सर्व-बाह्यैषणानां **भजतां** सेवमानानाम्।

किमर्थित्वादिना कारणेननेत्याह **प्रीतिपूर्वकं** प्रीतिः स्नेहः तत्पूर्वकं मां भजतामित्यर्थः।

**ददामि** प्रयच्छामि **बुद्धियोगं** बुद्धिः सम्यग्दर्शनं मत्तत्त्व-विषयं तेन योगो बुद्धियोगस्तं बुद्धियोगम्।

**येन** बुद्धि-योगेन सम्यग्दर्शन-लक्षणेन **मां** परमेश्वरमात्म-भूतम् आत्मत्वेन **उपयान्ति** प्रतिपद्यन्ते।

के **ते** ये मच्चित्तत्वादि-प्रकारैर्मां भजन्ते।। १० ।।

किमर्थं कस्य वा त्वत्प्राप्तिप्रतिबन्धहेतोः नाशकं बुद्धियोगं तेषां त्वद्भक्तानां ददासि इत्याकांक्षायामाह -

**तेषामेवानुकम्पार्थम् अहम् अज्ञानजं तमः।**

**नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता।। १०.११ ।।**

For them alone, out of compassion, I, obtaining in the thought of the mind, destroy the delusion born of ignorance by the shining lamp of knowledge. 11

तेषामिति। **तेषामेव** कथं नु नाम श्रेयः स्यादिति **अनुकम्पार्थं** दयाहेतोः **अहम्** **अज्ञानजम्** अविवेकतो जातं मिथ्या-प्रत्यय-लक्षणं मोहान्धकारं **तमः** **नाशयामि** **आत्मभावस्थः** आत्मनो भावोऽन्तःकरणाशयस्तस्मिन्नेव स्थितः सन्।

**ज्ञानदीपेन** विवेक-प्रत्यय-रूपेण, भक्ति-प्रसाद-स्नेहाभिषिक्तेन, मद्भावनाभिनिवेश-वातेरितेन, ब्रह्मचर्यादि-साधन-संस्कारवत्प्रज्ञा-वर्त्तिना, विरक्तान्तःकरणाधारेण, विषय-व्यावृत्त-चित्त-राग-द्वेषाकलुषित-निवातापवरकस्थेन नित्य-प्रवृत्तैकाग्र्य-ध्यान-जनित-सम्यग्दर्शन-**भास्वता** ज्ञानदीपेन इत्यर्थः।। ११ ।।

यथोक्तां भगवतो विभूतिं योगं च श्रुत्वा -

**अर्जुन उवाच**

**परं ब्रह्म परं धाम पवित्रं परमं भवान्**

**पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्।। १०.१२ ।।**

परं ब्रह्म परं धाम पवित्रं परमं भवान् पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्।। १२ ।।

परमिति। **परं** **ब्रह्म** परमात्मा **परं** **धाम** परं तेजः **पवित्रं** पावनं **परमं** प्रकृष्टं **भवान्** **पुरुषं** **शाश्वतं** नित्यं

**दिव्यं** दिवि भवम् **आदिदेवं** सर्व-देवानामादौ भवं देवम् **अजं** **विभुं** विभवन-शीलम्।। १२ ।।

ईदृशम् -

**आहुस्त्वामृषयस्सर्वे देवर्षिर्नारदस्तथा।**

**असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे।। १०.१३ ।।**

आहुस्त्वामृषयस्सर्वे देवर्षिर्नारदस्तथा। असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे।। १३।।

.*Arjuna* said:
O! Revered one, you are limitless *Brahman,* the light of all lights, the most purifying. All the sages, including *Narada*, the sage among gods, *Asita*, *Devala*, and *Vydsa* talk of you as the eternal being, not of this world, the source of all the gods, unborn and all pervasive. And indeed, you yourself tell me so. 12, 13

आहुरिति। **आहुः** कथयन्ति **त्वामृषयः** वसिष्ठादयः **सर्वे** **देवर्षिः** **नारदः**। **तथा** **असितो** **देवलः** अपि

एवमेवाह। **व्यासः** च **स्वयं** **चैव** **ब्रवीषि** **मे**।। १३ ।।

**सर्वमेतदृतं मन्ये यन्मां वदसि केशव।**

**न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः।। १०.१४ ।।**

सर्वमेतदृतं मन्ये यन्मां वदसि केशव। न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः।। १४।।

All this, which you have told me, O! Lord, I consider true. Indeed, Lord, neither the celestials nor the *raksasas* know your person, i.e., they do not know what you are. 14

सर्वमिति। **सर्वमेतद्** यथोक्तं ऋषिभिस्त्वया च तद् **ऋतं** सत्यमेव **मन्ये** **यन्मां** प्रति **वदसि** भाषसे हे **केशव**।

**न** **हि** **ते** तव **भगवन्** **व्यक्तिं** प्रभवं **विदुः** न **देवाः** **न** **दानवाः**।। १४।।

**स्वयमेवाऽऽत्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम।**

**भूतभावन भूतेश देवदेव जगत्पते ।। १०.१५ ।।**

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम। भूतभावन भूतेश देव देव जगत्पते ।। १५।।

You yourself know your self with your own mind, O! The most exalted being, the creator of all beings, the ruler of all beings, the Lord of the gods, the Lord of creation. 15

स्वयमिति। **स्वयमेव** **आत्मना** **आत्मानं** **वेत्थ** जानासि **त्वं** निरतिशय-ज्ञानैश्वर्य-बलादि-शक्तिमन्तम्

ईश्वरं **पुरुषोत्तम**।

भूतानि भावयतीति भूत-भावनः हे **भूतभावन**, **भूतेश** भूतानामीश, हे **देवदेव**, **जगत्पते** ।। १५ ।।

**वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः।**

**याभिर्विभूतिभिर्लोकान् इमांस्त्वं व्याप्य तिष्ठसि।। १०.१६ ।।**

You indeed are capable of telling in full the extraordinary glories of yourself, the glories by which you remain pervading these worlds. 16

वक्तुमिति। **वक्तुं** कथयितुम् **अर्हस्यशेषेण** **दिव्याः** **ह्यात्मविभूतयः** आत्मनो विभूतयो यास्ता वक्तुमर्हसि।

**याभिर्विभूतिभिः** आत्मनो माहात्म्य-विस्तरैः **इमान्** **लोकान्** **त्वं** **व्याप्य** **तिष्ठसि**।। १६ ।।

**कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन्**

**केषु केषु च भावेषु चिन्त्योऽसि भगवन् मया।। १०.१७ ।।**

Always contemplating, how can I know you, O! The greatest of the *yogis?* And in which things are you to be meditated upon by me, O! Lord? 17

कथमिति। **कथं** **विद्यां** विजानीयाम् **अहं** हे **योगिंस्त्वां** **सदा** **परिचिन्तयन्**।

**केषु** **केषु** **च** **भावेषु** वस्तुषु **चिन्त्योऽसि** ध्येयोऽसि **भगवन्** **मया**।। १७ ।।

**विस्तरेणाऽऽत्मनो योगं विभूतिं च जनार्दन।**

**भूयः कथय तृप्तिर्हि श्रृण्वतो नास्ति मेऽमृतम्।। १०.१८ ।।**

Please describe again in detail the wonder and the glory of yourself, O! Lord, because I, the listener of this nectar, have no satisfaction. 18

विस्तरेणेति। **विस्तरेणाऽऽत्मनो** **योगं** योगैश्वर्य-शक्ति-विशेषं **विभूतिं** **च** विस्तरं ध्येय-पदार्थानां हे **जनार्दन** अर्दतेः गति-कर्मणो रूपम्। असुराणां देव-प्रतिपक्ष-भूतानां जनानां नरकादि-गमयितृत्वाद् जनार्दनः(अर्द गतौ याचने च अर्दति) । अभ्युदय-निःश्रेयस-पुरुषार्थ-प्रयोजनं सर्वैर्जनैर्याच्यत इति वा। **भूयः** पूर्वमुक्तमपि **कथय**। **तृप्तिः** परितोषः **हि** यस्माद् **नास्ति** **मे** **श्रृण्वतः** त्वन्मुख-निःसृत-वाक्यामृतम्।। १८ ।।

**श्री भगवानुवाच**

**हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः।**

**प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे।। १०.१९ ।।**

यत्र यत्र जातौ या या व्यक्तिः प्रधाना ताम्। विशेषेण भूतिः भवनम् विभूतिः। हन्त इति आश्चर्ये। आकाशतुल्ये ब्रह्मणि भवन्ति इति भवाः। अन्तः इति अवधिः न तु नाशः

*Sri Bhagavan* said:

Well now, O! Best of the *Kurus*, *Arjuna*, I will tell you My divine glories in keeping with their importance; because there is no end to a detailed description of My glories. 19

हन्त इति। **हन्त** इदानीं **ते** तव **दिव्याः** दिवि भवाः **आत्मविभूतयः** आत्मनो मम विभूतयो यास्ताः

**कथयिष्यामि** इत्येतत्।

**प्राधान्यतः** यत्र यत्र प्रधाना या या विभूतिस्तां तां प्रधानां प्राधान्यतः कथयिष्याम्यहं **कुरुश्रेष्ठ**।

अशेषतस्तु वर्षशतेनापि न शक्या वक्तुं यतो **नास्त्यन्तो** **विस्तरस्य** **मे** मम विभूतीनामित्यर्थः।। १९ ।।

तत्र प्रथममेव तावच्छृणु - अहमिति।

**अहमात्मा गुडाकेश सर्वभूताशयस्थितः।**

**अहमादिश्च मध्यं च भूतानामन्त एव च।। १०.२० ।।**

गुडवत् घनकेशः यस्य। पृषोदरादित्वात् आकारः गुडा इति।

O! The master of the sleep, *Arjuna*, I am the self, who resides in the hearts of all beings and I am the cause of the creation, sustenance, and resolution of all beings/things. 20

अहमिति। **अहमात्मा** प्रत्यगात्मा **गुडाकेश** गुडाका निद्रा तस्या ईशो गुडाकेशो जितनिद्रः इत्यर्थः।

घनकेश इति वा।

**सर्वभूताशयस्थितः** सर्वेषां भूतानामाशये अन्तर्हृदि स्थितः अहमात्मा प्रत्यगात्मा नित्यं ध्येयः।

तदशक्तेन चोत्तरेषु भावेषु चिन्त्योऽहं चिन्तयितुं शक्यो यस्माद् **अहम्** **एव** **आदिः** **भूतानां** कारणं तथा

**मध्यं** **च** स्थितिः **अन्तः** प्रलयश्च।। २० ।।

एवं च ध्येयोऽहम् -

**आदित्यानामहं विष्णुः ज्योतिषां रविरंशुमान्।**

**मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी।। १०.२१ ।।**

मरीचेः तदन्तरपुरुषस्य च ध्येयत्वम्। नक्षते गच्छति यजमानः एतदिति नक्षत्रमिति इष्टाधिकारिगन्तव्यलोकत्वात् शशी नक्षत्रम्। नक्ष् गतौ ८.प.प.

Among the *Adityas* I am *Visnu;* among the luminaries, the Sun, the one who has rays. Among the *Maruts,* I am *Marici;* among the luminaries seen at night, I am the Moon. 21

आदित्यानामिति। **आदित्यानां** द्वादशानां **विष्णुः** नाम आदित्यः **अहम्**। **ज्योतिषां** **रविः**

प्रकाशयितॄणामंशुमान् रश्मिमान्। **मरीचिः** नाम **मरुतां** मरुद्देवता-भेदानाम् **अस्मि**। **नक्षत्राणामहं** **शशी**

चन्द्रमाः।। २१ ।।

**वेदानां सामवेदोऽस्मि देवानामस्मि वासवः।**

**इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना।। १०.२२ ।।**

Among the Vedas I am the *Samaveda;* among the gods I am *Indra,* among the sense organs I am the mind, and of the embodied beings I am the faculty of cognition. 22

वेदानामिति। **वेदानां** मध्ये **सामवेदोऽस्मि**। **देवानां** रुद्रादित्यादीनां **वासवः** इन्द्रः **अस्मि**।

**इन्द्रियाणाम्** एकादशानां चक्षुरादीनां **मनश्चास्मि** सङ्कल्प-विकल्पात्मकं मनश्चास्मि।

**भूतानामस्मि** **चेतना** कार्य-करण-सङ्घाते नित्याभिव्यक्ता बुद्धि-वृत्तिश्चेतना।। २२ ।।

**रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम्।**

**वसूनां पावकश्चास्मि मेरुः शिखरिणामहम्।। १०.२३ ।।**

Among the *Rudras* I am *Sahikara;* I am *Kubera* among the *yaksas* and *raksasas.* Among the *Vasus* I am Fire. I am *Meru* among the snow-peaked mountains. 23

रुद्राणामिति। **रुद्राणाम्** एकादशानां **शङ्करश्चास्मि**। **वित्तेशः** कुबेरो **यक्षरक्षसां** यक्षाणां रक्षसां च।

**वसूनाम्** अष्टानां **पावकश्चास्मि** अग्निः। **मेरुः** **शिखरिणां** शिखरवताम् **अहम्**।। २३ ।।

**पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्।**

**सेनानीनामहं स्कन्दः सरसामस्मि सागरः।। १०.२४ ।।**

*Arjuna*, may you know Me to be *Brhaspati*, the chief among the priests. Among the commanders-in-chief I am *Skanda;* among the water reservoirs I am the ocean. 24

पुरोधसामिति। **पुरोधसां** च राज-पुरोहितानां **च** **मुख्यं** प्रधानं **मां** **विद्धि** जानीहि हे **पार्थ** **बृहस्पतिम्**।

स हि इन्द्रस्येति मुख्यः स्यात् पुरोधाः। **सेनानीनां** सेनापतीनाम् **अहं** **स्कन्दः** देव-सेनापतिः।

**सरसां** यानि देव-खातानि सरांसि तेषां सरसां **सागरोऽस्मि** भवामि।। २४ ।।

**महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम्।**

**यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः।। १०.२५ ।।**

Among the sages I am *Bhrgu*, among the words I am the single syllable *Om*, among rituals I am the ritual of*japa*, among the mountains, the Himalayas. 25

महर्षीणामिति। **महर्षीणां** **भृगुरहम्**। **गिरां** वाचां पद-लक्षणानाम् **एकमक्षरम्** ओङ्कारः **अस्मि**।

**यज्ञानां** **जपयज्ञोऽस्मि**। **स्थावराणां** स्थितिमतां **हिमालयः**।। २५ ।।

**अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः।**

**गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः।। १०.२६ ।।**

I am the sacred ficus tree among all the trees and among the celestial sages, I am *Narada*. Among the *gandharvas*, I am *Citraratha*, among the *siddhas*, I am the sage, *Kapila. 26*

अश्वत्थ इति। **अश्वत्थः** **सर्ववृक्षाणाम्**। **देवर्षीणां** **च** **नारदः** देवा एव सन्त ऋषित्वं प्राप्ता मन्त्र-

दर्शित्वात् (ऋषति जानाति इति ऋषिः) ते देवर्षयस्तेषां नारदोऽस्मि। **गन्धर्वाणां** **चित्ररथः** नाम

गन्धर्वोऽस्मि।

**सिद्धानां** जन्मनैव धर्म-ज्ञान-वैराग्यैश्वर्यातिशयं प्राप्तानां **कपिलो** **मुनि**ः।। २६ ।।

**उच्चैःश्रवसमश्वानां विद्धि मामृतोद्भवम्।**

**ऐरावतं गजेन्द्राणां नराणां च नराधिपम्।। १०.२७ ।।**

May you know Me among the horses as *UccaigSravas*, born of the churning for nectar, *Airdvata* among the elephants and the king among men. 27

उच्चैरिति। **उच्चैःश्रवसमश्वानाम्** उच्चैःश्रवा नामाश्वराजस्तं **मां** **विद्धि** विजानीहि **अमृतोद्भवम्** अमृत-

निमित्त-मथनोद्भवम्। **ऐरावतम्** इरावत्या अपत्यं **गजेन्द्राणां** हस्तीश्वराणाम्। तं मां विद्धीत्यनुवर्त्तते।

**नराणां** मनुष्याणां **च** **नराधिपं** राजानं मां विद्धि जानीहि।। २७ ।।

**आयुधानामहं वज्रं धेनूनामस्मि कामधुक्।**

**प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः।। १०.२८ ।।**

Among the weapons I am *Vajra;* among the cows I am the wish-fulfilling cow, and I am *Kandarpa*, the God of love, who is the cause for progeny; among the poisonous snakes I am *Vasuki. 28*

आयुधानामिति। **आयुधानाम्** **अहं** **वज्रं** दधीच्यस्थि-सम्भवम्। **धेनूनां** दोग्ध्रीणामस्मि **कामधुक्** वसिष्ठस्य

सर्व-कामानां दोग्ध्री सामान्या वा काम-धुक्। **प्रजनः** प्रजनयिता **अस्मि** **कन्दर्पः** कामः।

**सर्पाणां** सर्प-भेदानाम् **अस्मि** **वासुकिः** सर्प-राजः।। २८ ।।

**अनन्तश्चास्मि नागानां वरुणो यादसामहम्।**

**पितॄणामर्यमा चास्मि यमः संयमतामहम्।। १०.२९ ।।**

And I am *Ananta* among the many headed snakes; I am *Varuna* among the gods of water; among the manes I am *Aryamd;* I am *Yama* among those who enforce discipline. 29

अनन्त इति। **अनन्तश्चास्मि** **नागानां** नाग-विशेषाणां नाग-राजश्चास्मि।

**वरुणो** **यादसामहम्** अब्देवतानां राजाऽहम्। **पितॄणामर्यमा** नाम पितृ-राजः **चास्मि**।

**यमः** **संयमतां** संयमनं कुर्वताम् **अहम्**।। २९ ।।

**प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम्।**

**मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्।। १०.३० ।।**

And I am *Prahlada* among the *daityas,* the *asuras* who are born *of Diti.* Among things that reckon, I am the Time and among the wild animals I am the lion. And I am *Garuda* among the birds. 30

प्रह्लाद इति। **प्रह्लादः** नाम **चास्मि** **दैत्यानां** दिति-वंश्यानाम्।

**कालः** **कलयतां** कलनं गणनं कुर्वताम् **अहम्**। **मृगाणां** **च** **मृगेन्द्रः** सिंहो व्याघ्रो वा **अहम्**।

**वैनतेयश्च** गरुत्मान् विनता-सुतः **पक्षिणां** पतत्रिणाम्।। ३० ।।

**पवनः पवतामस्मि रामः शस्त्रभृतामहम्।**

**झषाणां मकरश्चास्मि स्त्रोतसामस्मि जाह्नवी।। १०.३१ ।।**

Among the purifiers, I am air. I am *Rama* among those who bear weapons. And among the fish I am shark; among the rivers I am *Ganga*.31

पवन इति। **पवनः** वायुः **पवतां** पावयितॄणाम् **अस्मि**।

**रामः** **शस्त्रभृतामहं** शस्त्राणां धारयितॄणां दाशरथी रामोऽहम्। **झषाणां** मत्स्यादीनां **मकरः** नाम जाति-

विशेषोऽहम्। **स्त्रोतसां** स्त्रवन्तीनाम् **अस्मि** **जाह्नवी** गङ्गा।। ३१ ।।

**सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन।**

**अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्।। १०.३२ ।।**

I am indeed the beginning, the middle, and the end of the creations, *Arjuna*. Among the disciplines of knowledge, I am the knowledge of the self. Of those who discuss, I am the discussion leading to truth. 32

सर्गाणामिति। **सर्गाणां** सृष्टीनाम् **आदिरन्तश्च** **मध्यं** **चैवाहम्** उत्पत्ति-स्थिति-लया अहम् **अर्जुन**।

भूतानां जीवाधिष्ठितानामेवादिरन्तश्चेत्याद्युक्तमुपक्रमे। इह तु सर्वस्यैव सर्ग-मात्रस्येति विशेषः।

**अध्यात्मविद्या** **विद्यानां** मोक्षार्थत्वात् प्रधानम् अस्मि।

**वादः** अर्थ-निर्णय-हेतुत्वात् **प्रवदतां** प्रधानमतः सः **अहम्** अस्मि।

प्रवक्तृ-द्वारेण वदन-भेदानामेव वाद-जल्प-वितण्डानामिह ग्रहणं प्रवदतामिति।। ३२ ।।

**अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च।**

**अहमेवाक्षयः कालो धाताहं विश्वतोमुखः।। १०.३३ ।।**

Among the letters I am 'a' and I am the *dvandva* among the compounds; I am indeed the perennially eternal time. I am the giver (of *karmaphala)* who is all-pervasive. 33

अक्षराणामिति। **अक्षराणां** वर्णानाम् **अकारो** वर्णः **अस्मि**। **द्वन्द्वः** समासोऽस्मि **सामासिकस्य** **च**

समास-समूहस्य। किञ्च **अहमेवाक्षयः** अक्षीणः **कालः** प्रसिद्धः क्षणाद्याख्यः। अथवा परमेश्वरः

कालस्यापि कालोऽस्मि। **धाताहं** कर्म-फलस्य विधाता सर्व-जगतो **विश्वतोमुख**ः सर्वतो-मुखः।। ३३ ।।

**मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम्।**

**कीर्त्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा।। १०.३४ ।।**

And I am Death that takes away everything; and I am the cause of prosperity of those yet to be. Among the feminine words I am fame, wealth, speech, memory, intelligence, fortitude, and equanimity. 34

मृत्युरिति। **मृत्युः** द्विविधो धनादिहरः प्राणहरश्च।

तत्र यः प्राणहरः स **सर्वहरः** उच्यते सः **अहम्** इत्यर्थः।

अथवा पर ईश्वरः प्रलये सर्वहरणात् सर्वहरः सोऽहम्। **उद्भवः** उत्कर्षोऽभ्युदयः तत्प्राप्तिहेतुश्चाहम्।

केषाम् **भविष्यतां** भावि-कल्याणानाम् उत्कर्ष-प्राप्ति-योग्यानामित्यर्थः।

**कीर्त्तिः** **श्रीर्वाक्च** **नारीणां** **स्मृतिर्मेधा** **धृतिः** **क्षमा** इत्येता उत्तमाः स्त्रीणामहमस्मि यासामाभास-मात्र-

सम्बन्धेनापि लोकः कृतार्थमात्मानं मन्यते।। ३४।।

**बृहत्साम तथा साम्नां गायत्री छन्दसामहम्।**

**मासानां मार्गशीर्षोऽहम् ऋतूनां कुसुमाकरः।। १०.३५ ।।**

So too, I am the *brhatsama* among the *samas, gayatri* among the metres; among the months, *Margasira*, among the seasons, the spring. 35

बृहत्सामेति। **बृहत्साम** **तथा** **साम्नां** प्रधानमस्मि।

**गायत्री** **छन्दसामहं** गायत्र्यादि-च्छन्दो-विशिष्टानाम् ऋचां गायत्र्यृग् अहमस्मीत्यर्थः।

**मासानां** **मार्गशीर्षोऽहम्**। **ऋतूनां** **कुसुमाकरः** वसन्तः।। ३५ ।।

**द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम्।**

**जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम्।। १०.३६ ।।**

I am the game of dice among the things that deceive; of the brilliant I am the brilliance. I am the victory of the victorious. I am the clarity in thinking (of those who have that clarity). Of those whose nature is predominantly *sattva,* I am that *sattva* (contemplative disposition). 36

द्यूतमिति। **द्यूतम्** अक्ष-देवनादि-लक्षणं **छलयतां** छलस्य कर्त्तॄणाम् **अस्मि**। **तेजः** **तेजस्विनामहम्**।

**जयोऽस्मि** जेतॄणाम्। **व्यवसायोऽस्मि** व्यवसायिनाम्। **सत्त्वं** **सत्त्ववतां** सात्त्विकानाम् **अहम्**।। ३६ ।।

**वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः।**

**मुनीनामप्यहं व्यासः कवीनामुशना कविः।। १०.३७ ।।**

Among the *Yadavas,* I am *Vasudeva (Krsna),* among the *Pandavas,Dhanaijaya (Arjuna),* and among the seers I am *Vydsa;* among the sages, the preceptor *Usana.* 37

वृष्णीनामिति। **वृष्णीनां** यादवानां **वासुदेवोऽस्मि**। अयमेवाहं त्वत्सखा।

**पाण्डवानां** **धनञ्जयः** त्वमेव। **मुनीनां** मनन-शीलानां सर्व-पदार्थ-ज्ञानिनाम् **अप्यहं** **व्यासः**।

**कवीनां** क्रान्त-दर्शिनाम् **उशना** **कविः** अस्मि।। ३७ ।।

**दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम्।**

**मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम्।। १०.३८ ।।**

I am the discipline of those who enforce discipline. I am justice of those who want success and I am silence among the secrets. Of those who have knowledge, I am that knowledge. 38

दण्ड इति। **दण्डो** **दमयतां** दमयितॄणाम् **अस्मि** अदान्तानां दमन-कारणम्।

**नीतिरस्मि** **जिगीषतां** जेतुमिच्छताम्। **मौनं** **चैवास्मि** **गुह्यानां** गोप्यानाम्। **ज्ञानं** **ज्ञानवतामहम्**।। ३८।।

**यच्चापि सर्वभूतानां बीजं तदहमर्जुन।**

**न तदस्ति विना यत्स्यात् मया भूतं चराचरम्।। १०.३९ ।।**

And *Arjuna*, I am also that which is the cause of all things. There is no mobile or immobile/sentient or insentient thing, which can exist without Me. 39

यदिति। **यच्चापि सर्वभूतानां बीजं** प्ररोह-कारणं **तदहमर्जुन**।

प्रकरणोपसंहारार्थं विभूति-संक्षेपमाह - **न तदस्ति भूतं चराचरं** चरमचरं वा **मया विना यत्स्याद्**

भवेत्।

मयापकृष्टं परित्यक्तं निरात्मकं शून्यं हि यस्मात्। अतो मदात्मकं सर्वमित्यर्थः।। ३९।।

**नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप।**

**एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया।। १०.४० ।।**

There is no end to My extraordinary glories, *Arjuna*. But this detailed narration was told by Me taking into account a few important ones. 40

नान्तोऽस्तीति। **नान्तोऽस्ति** **मम** **दिव्यानां** **विभूतीनां** विस्तराणां **परन्तप**।

न हीश्वरस्य सर्वात्मनो दिव्यानां विभूतीनाम् इयत्ता शक्या वक्तुं ज्ञातुं वा केनचित्।

**एष** **तूद्देशतः** एकदेशेन **प्रोक्तो** **विभूतेर्विस्तरो** **मया**।। ४० ।।

**यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।**

**तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्।। १०.४१ ।।**

Whatever existent thing there is, which has glory, which is endowed with any form of wealth, or that which is distinguished or mighty, every one of that, may you know is born of a fraction of My glory. 41

यद्यदिति। **यद्यद्** लोके **विभूतिमद्** विभूति-युक्तं **सत्त्वं** वस्तु **श्रीमदूर्जितमेव** **वा** श्रीर्लक्ष्मीस्तया सहितम्,

उत्साहोपेतं वा **तत्तदेवावगच्छ** **त्वं** जानीहि **मम** ईश्वरस्य **तेजोंऽशसम्भवं** तेजसोंऽश एकदेशः सम्भवो

यस्य तत् तेजोंऽश-सम्भवमित्यवगच्छ त्वम्।। ४१ ।।

**अथवा बहुनैतेन किं ज्ञातेन तवार्जुन।**

**विष्टभ्याहमिदं कृत्स्नं एकांशेन स्थितो जगत्।। १०.४२ ।।**

On the other hand by this knowledge of manifold things what is accomplished for you *Arjuna?*
I remain pervading this entire world with one part (of Myself). 42

अथवेति। **अथवा** **बहुनैतेन** एवमादिना **किं** **ज्ञातेन** **तवार्जुन** स्यात् सावशेषेण।

अशेषतः त्वमिमम् उच्यमानमर्थं श्रृणु। **विष्टभ्य** विशेषतः स्तम्भनं दृढं कृत्वा **इदं** **कृत्स्नं** **जगद्** **एकांशेन**

एकावयवेन एकपादेन सर्वभूत-स्वरूपेणेत्येतत्।

तथा च मन्त्र-वर्णः पादोऽस्य विश्वा भूतानि (ऋ.सं. १०.९०.३) इति। **स्थितः** अहमिति।। ४२ ।।

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
श्रीमद्भगवद्गीताभाष्ये दशमोऽध्यायः।।